पुनः प्राहार्त्तनादेन सहस्रकिरणात्मजम् ।
स मत्स्यः पाहि पाहीति त्वामहं शरणं गतः ॥
ततः स कूपे तं मत्स्यं प्राहिणोद्रविनन्दनः ।
यदा न माति तत्रापि कूपे मत्स्यः सरोवरे ॥
क्षिप्तोऽसौ पृथुतामागात् पुनर्योजनसम्मितः ।
तत्राप्याह पुनर्दीनः पाहि पाहि नृपोत्तमम् ॥
ततः स मनुना क्षिप्तो गङ्गायामप्यवर्द्धत ।
यदा तदा समुद्रे तं प्राक्षिपन्मेदिनीपतिः ॥
यदा समुद्रमखिलं व्याप्यासौ समुपस्थितः ।
तदा प्राह मनुर्भीतः कोऽपि त्वमसुरेश्वरः ॥
अथवा वासुदेवस्त्वमन्य ईदृक् कथं भवेत् ।
योजनायुतविंशत्या कस्य तुल्यं भवेद्वपुः ॥
ज्ञातस्त्वं मत्स्यरूपेण मां खेदयसि केशव ! ।
हृषीकेश ! जगन्नाथ ! जगद्धाम ! नमोऽस्तु ते ॥
एवमुक्तः स भगवान् मत्स्यरूपी जनार्द्दनः ।
साधु साध्विति चोवाच सम्यक् ज्ञातस्त्वयानघ ! ॥
अचिरेणैव कालेन मेदिनी मेदिनीपते ! ।
भविष्यति जले मग्ना सशैलवनकानना ॥
नौरियं सर्व्वदेवानां निकायेन विनिर्म्मिता ।
महाजीवनिकायस्य रक्षणार्थं महीपते ! ॥
स्वेदाण्डजोद्भिज्जो ये वै ये च जीवा जरायुजाः ।
अस्यां निधाय सर्व्वांस्तानन्नाथान् पाहि
सुव्रत ! ॥
युगान्तवाताभिहता यदा भवति नौर्नृप ! ।
शृङ्गेऽस्मिन् मम राजेन्द्र ! तदेमां संयमिष्यसि ॥
ततो लयान्ते सर्व्वस्य स्थावरस्य चरस्य च ।
प्रजापतिस्त्वं भविता जगतः पृथिवीपते ! ॥
एवं कृतयुगस्यादौ सर्व्वज्ञो धृतिमान् नृपः ।
मन्वन्तराधिपश्चैव देवपूज्यो भविष्यसि ॥”
इति मत्स्यपुराणे मनुविष्णुसंवादे प्रथमे सर्गे प्रथमोऽध्यायः ॥ विस्तारस्तु श्रीभागवते ८ स्कन्धे २४ अध्याये द्रष्टव्यः ॥*॥ तस्य मन्त्रध्यानपूजादि यथा,—

शङ्कर उवाच ।
“एक एवाभवन्मत्स्यावतारः कल्प आदिमे ।
तस्य मन्त्रं प्रवक्ष्यामि भुक्तिमुक्तिप्रदायकम् ॥
तारो नमो भगवते मं मत्स्याय रमां वदेत् ।
द्वादशाक्षरमन्त्रोऽयं मुनिब्रह्मा समीरितः ॥
गायत्री छन्द उदितं देवता मीनविग्रहः ।
भगवान् शर्व्वरीनाथो बीजं श्रीपश्चकीलकम् ॥
नाभ्यधो रोहितसम आकण्ठञ्च नराकृतिः ।
घनश्यामश्चतुर्बाहुः शङ्खचक्रगदाधरः ॥
शृङ्गीमत्स्यनिभो स्रग्वी लक्ष्मीवक्षोविराजितः ।
पद्मचिह्नितसर्व्वाङ्गः सुन्दरश्चारुलोचनः ॥
जपेद्द्वादशसाहस्रं त्रिमध्याक्लेक्लिन्नैर्हुनेत् ।
प्रत्यहं तद्दशांशेन वैशाखे कार्त्तिके तथा ।
माघे च मार्गशीर्षे च हविष्याशी जितेन्द्रियः ॥
आरभ्य भाद्रबहुलमष्ट वा षोड़शाहकम् ।
लक्ष्मीमनुं जपेन्नित्यमिदञ्चापि कलाशतम् ॥
तथैव होमः कर्त्तव्यस्तथान्यदिवसेषु तु ।
तर्पयेद्द्वादशशतं तिलतण्डुलचन्दनैः ॥
आज्येन्तथा शताष्टौ च तर्पयेच्च तथा श्रियम् ।
रक्तोत्पलैर्वा पद्मैर्वा मालत्याद्यैः सुगन्धिभिः ।
एवं कृते वर्षमेकं मन्त्रसिद्धिः प्रजायते ॥
नित्यं द्वादशविप्रांश्च श्रीरूपाश्च सुवासिनीम् ।
भोजयेत् पूजनञ्चास्य चरेत्तौ वाशयेत् सदा ॥
षट्पत्रकर्णिकायाञ्च श्रीयुतं देवमर्च्चयेत् ।
षट्पत्रेषु षड़ङ्गानि यजेद्द्वाह्यचतुर्द्दले ॥
मण्डूकं मकरं कूर्म्मं शिशुमारञ्च पूर्व्वतः ।
तद्बाह्येऽष्टदले पूज्याः क्षाराद्याः सप्त सिन्धवः ॥
तद्बाह्येऽङ्कदले पूज्या वासुक्याद्याः फणीश्वराः ।
तस्य बाह्ये शक्रदले रत्नानि तु चतुर्द्दश ॥
समुद्रजानि पूज्यानि लक्ष्मीकौस्तुभकानि च ।
गङ्गाद्याः षोड़श ततो महानद्यः प्रपूजयेत् ॥
ततश्चाष्टदले वेदानुपवेदसमन्वितान् ।
दिगीशांश्च तदस्त्राणि नवावरणपूजनम् ।
एवं सिद्धमनुर्मन्त्री जायते सिद्धिभाजनम् ॥
एतदुक्तशतं मन्त्रं जपेदष्टोत्तरं शतम् ।
तद्दैवतादिने सिद्धः पुस्तकादेव जायते ॥
अकुण्ठितप्रयोगेषु न पुनस्तस्य संस्कृतिः ।
एतत्पल्लविता मन्त्रा मम सिद्ध्यन्ति पार्व्वति ! ॥
एतत्संपुटिताः सर्व्वे वैदिकाः सिद्धिदाः कलौ ।
अनेन ग्रथिता जप्ताः कलेश्च द्रुतसिद्धिदाः ॥”
इति मेरुतन्त्रे २६ प्रकाशः ॥

मत्स्यकरण्डिका, स्त्री, (मत्स्यस्य करण्डिकेव) मत्स्यरक्षणपात्रम् । खालुइ इति भाषा । तत्पर्य्यायः । मत्स्यधानी २ कुवेणी ३ । इति जटाधरः ॥

मत्स्यगन्धा, स्त्री, (मत्स्यस्येव गन्धो यस्याः । छान्दसादित्वाभावः ।) लाङ्गलीवृक्षः । स च जलपिप्पली । इति जटाधरः राजनिर्घण्टश्च ॥ व्यासमाता ॥ (अस्या उत्पत्तिकथा यथा, एकदा चेदीश्वरो वसुराजः पितृगणनियोजितो मृगयेच्छुर्वनं गत्वा स्वपत्नीं गिरिकां ऋतुस्नातां स्मरन् आस्ते । इत्यवसरे कामोद्दीपकवसन्तवायुना प्रेर्य्यमाणस्य तस्य रेतः प्रचस्कन्द । ततस्तद्वीर्य्यं सपत्रपुटे स्थापितवान् । एतत्तु मया न स्खलितमिति निश्चित्य अभिमन्त्र्य च तत् श्यामलित-श्येनेन प्रियायै प्रेषयामास । तदादाय उड्डीयमानस्य अन्येन च श्येनेन सह विहायसि युध्यतस्तस्य पदात् भ्रष्टं कालिन्दीजले पपात वीर्य्यम् । अथ तद्वेतः ब्रह्मशापान्मत्स्यरूपिणी अद्रिका नाम्नी काचिदप्सरा भक्षितवती धीवरास्तु तां पूर्णगर्भां मत्स्यीं बबन्धुः ततस्तेतु तस्या उदरात् एकां स्त्रियमेकञ्च पुरुषमुज्जह्रुः । तयोस्तु पुरुषो मत्स्यो नाम राजा,सा कन्या च मत्स्यगन्धेति ख्याताऽसीत् ॥ वचा । तत्पर्य्यायो यथा,—
“तत्रास्ते प्रथमं फलं मत्स्यसदृशं विस्रगन्धं द्वितीयमश्वत्थफलसदृशं मत्स्यगन्धं तयोर्नामानि ।
“वचा पुष्पवस्ता च पराश्वत्थफला मता ।
मत्स्यगन्धा शौहृन्नी विघ्नी ध्वाङ्क्षनाशिनी ॥”
मत्स्याक्षी ॥ तत्पर्य्यायो यथा,—
“मत्स्याक्षी वाह्निका मत्स्यगन्धा मत्स्यादनीति च ।”
जलपिप्पल्यर्थे पर्य्यायो यथा,—
“जलपिप्पल्यभिहिता शारदी शकलादनी ।
मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि
कीर्त्तिता ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

मत्स्यघण्टः, पुं, (मत्स्यानां घण्टः विमिश्रणं यत्र सः ।) स्वनामख्यातमत्स्यव्यञ्जनम् । तत्पर्य्यायः । गलग्रहः २ । इति शब्दचन्द्रिका ॥

मत्स्यजालं, क्ली, (मत्स्यधारणार्थं जालं शाकपार्थिववत् समासः ।) आनायः । इति हेमचन्द्रः । ३ ।५६३ । माछधरा जाल इतिभाषा ॥

मत्स्यण्डिका, स्त्री, (मदं मधुररसं स्यन्दते इति । स्यन्द + ण्वुल् + टाप् । अत इत्वञ्च । पृषोदरादित्वात् साधुः । शर्कराविशेषः । मिछरि इति भाषा । यथा,—
“लसीकाफाणितगुड़खण्डमत्स्यण्डिकासिताः ।
निर्म्मला लघवो ज्ञेयाः शीतवीर्य्या यथोत्तरम् ।
यथा यथैषां वैमल्यं भवेच्छैत्यं तथा तथा ॥”
इति राजवल्लभः ॥
राव इति हिन्दीभाषा । तस्य लक्षणं यथा,—
“इक्षोरसो यः संपक्वो घनः किञ्चिद्द्रवा-
न्वितः ।
मन्द यत् स्यन्दते यस्मान्मत्स्यण्डीति निगद्यते ॥”
अस्य गुणाः ।
“मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिला-
पहा ।
मधुरा बृंहणी वृष्या रक्तदोषापहा स्मृता ॥”
इति भावप्रकाशः ॥

मत्स्यण्डी, स्त्री, खण्डविकारः । इत्यमरः ।२।९।४३॥ इक्षुविशेषस्य रसपाके खण्डयोग्ये सारभूते या गुड़िकाकारा जायते सा मत्स्यण्डी । खण्डशालूकं मिछरि इति ख्याते नवात् इति ख्यातापि मत्स्यण्डीति केचित् । मत्स्याण्डाकारत्वात् मत्स्यण्डी मनीषादित्वादलुक् नदादित्वादीप् मत्स्यमनिति मत्स्यण्डी अन प्राणने डः इत्यन्ये । मदं स्यन्दते मत्सण्डीति केचित् । इति भरतः ॥ (यथास्या लक्षणं गुणाश्च ॥ रावकाकव खण्डराव इति लोके ।
“इक्षो रसो यः सम्पक्वो घनः किञ्चिद्द्रवान्वितः ।
मन्दं यत् स्यन्दते यस्मात्तन्मत्स्यण्डी निगद्यते ॥
मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिला-
पहा ।
मधुरा बृंहणी वृष्या रक्तदोषपहा स्मृता ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥

मत्स्यधानी, स्त्री, (मत्स्या धीयन्ते । यत्रेति मत्स्य + धाञ् + ल्युट् ङीप् ।) मत्स्यरक्षार्थपात्रम् । खारयी इति खालुइ इति च भाषा । तत्पर्य्यायः । कुवेणी २ । इत्यमरः । १ । १० । १६ ॥ मत्स्यकरण्डिका३ खारयिका४ मत्स्यबन्धनी ५ कुवेणिः ६ कुवेणा ७ कुपिनी८ कुपिनिः ९ । इतिभरतः ॥ सा स्वल्पा चेत् कुपिनी भवेत् इति शब्दरत्नावली ॥